# सामिधेनी मन्त्र प्रयोग विवरणम्

DSV Jagannatha Sharma Assistant Professor
Kalpa Department, S.V. Vedic University,Tirupati

**स्त्रियस्तेन यद्दचस्त्रियस्तेन यद्वायत्रियः स्त्रियस्तेन यत् समिधेन्यों**
**वृषंण्वतीमन्यांह (४)तेंन पुँस्वंतीस्तेन सेन्द्रास्तेनं मिथुना**

पादः। तस्य यदनुवचनं सः एव तासाम् एकः वर्णः। [1]"तमेवार्थं समर्थयते" 'तं त्वा' इति।
ज्योतिष्नत्त्वमासां घृतसंबन्धेन क्रियते 'तेजो घृतम्' इति। अथ वर्णान्तराण्याह-स्त्रियस्तेनेत्यादि।
ऋक्त्वेन [2]गायत्रीत्वेन सामिधेनीत्वेन त्रिप्रकारं स्त्रीत्वमासाम् ||

**वृषण्वतीमिति ॥**

"वृषणं त्वा वयं वृषन्" (तैब्रा ३.५.२) [3]इत्येतत्संबन्धेनैताः पुंस्त्ववत्यः सेन्द्राः मिथुनाः च भवन्ति।
वृषा सेक्ता पुमान्।
"तसौ मत्वर्थे" (पा १.४.१९) इति भत्वम्।
वृषा इन्द्रः प्रधानत्वाद्देवतानाम्।
स्त्रीत्वात् पुंसो योगाच्च मिथुन वमासामस्तीति मिथुनाः।
पामादित्वान्नप्रत्ययः (पा ५.२.१००)। केचिदाहुः - "स नः पृथु श्रवाय्यम्" (तैब्रा ३.५.२)।
इत्यन्तानां चतसृणां पूर्वं स्तुतिः कृता। "अग्निं दूतम्" (तैब्रा ३.५.२) इत्यादीनां स्तुतिः करिष्यते।
"ईडेन्यः" (तैब्रा ३.५.२) इत्यादीनां तिसृणां 'वृषण्वतीमन्वाह' इत्यादिका स्तुतिः
क्रियते इति।"अनो नुट्" (पा ८.२.१६) इति नुट्।
अयस्मयादित्वेन (प १.४.२०) भत्वात् पदकालेपि तस्य णत्वं न निवर्तते ॥
द्विरङ्गिरः (तैब्रा ३०५०२) इति एतामृचं पठेत्। तस्यामृचि घृतेन वर्धयामसि [4]इत्ययं पादो वर्तते।
[5]"तत् तेन पादपाठेन" सामिधेनीषु एव ज्योतिः जनयति। [6]त्वमेतं पादं पठन्नपि महिमानं न जानासि।
अहं तु जानामि। तस्मादार्द्र काष्ठे मयाग्निरुत्पादितः ॥

**स्त्रिय इति ॥**

'वृषणं त्वा वयम्' इत्येतामृचं विशेषतः प्रशंसति - 'स्त्रियस्तेन यद्दचः स्त्रियस्तेन यद्गायत्रियः स्त्रियस्तेन यत् सामिधेन्यो वृषण्वतीमन्वाह तेन पुरस्वतीस्तेन सेन्द्रास्तेन मिथुनाः' इति॥
ऋग्गायत्री सामिधेनीशब्दैः स्त्रीलिङ्गैरभिधीयमानत्वात् स्त्रीत्वमेव।
अतः पुरुषत्वाय वृषञ् - शब्दवतीमृचं ब्रूयात्।
तेन पाठेन पुरस्वतीः पुरुषवत्यः सेन्द्राः इन्द्रिययुक्ताः [7]स्त्रीपुरुष मिथुनरूपाः संपद्यन्ते।
ईडेन्यः (तैब्रा ३.५.२) इत्येषापि वृषण्वती, ' समग्निरिध्यते वृषा' इत्यन्ते पठितत्वात्।
"वृषो अग्निः" (तैब्रा ३.५.२) इत्येषापि वृषशब्दोपेतत्वात् वृषण्वती। [8]तयोरप्युक्तप्रशंसा द्रष्टव्या ॥

**अग्निर्देवानां दूत आसींदुशनां काव्योसुंराणा तौ प्रजापंतिं प्रश्नमेंताँ स प्रजा – पंतिरग्निं दूतं वृंणीमह इत्यभि पर्यावंर्तत ततों देवा अभंवन् परासुंरा यस्यैवं विदु- षोग्निं दूतं वृंणीमह इत्यन्वाह भवंत्यात्मना परांस्य भ्रातृंव्यो भवत्यध्वरवंतीमन्वांह**

अग्निर्देवानामित्यादि ॥ दूतः [9]हविषां देवसकाशं [10]प्रापयिता।
देवानां [11]यतताम् अग्निः दूतः अभवत्।
असुराणां कवेः पुत्रः उशना शुक्रो दूतोभवत्।
अवन्ती (?) छान्दसमन्तोदात्तत्वम्।
"ऋदुशन स्पुरुदंसः" (पा ७.१.९४) इत्युशनसोनङादेशः।
अथ तौ प्रजापतिं प्रश्नम् ऐताम्- आवयोः को यागे दूत्यमर्हतीति प्रजापतिसकाशम् [12]अगच्छताम्।
"यजयाच" (पा ३.३.९०) इति कर्मणि प्रत्ययः।
विभक्तिव्यत्ययो वा प्रश्नार्थं प्रजापतिमतामिति।
अथ पृच्छ्यमानः प्रजापतिः "अग्निं दूतं वृणीमहे" (तैब्रा ३.५.२) इति इमामृचं ब्रुवन्, अग्निमेव अभि पर्यावर्तत अग्निमेवालक्ष्य पर्यावृत्तोभवत्।

---

[1] लंण हो . तमर्थयतेय तं३ तदेव समर्थयते।
[2] लंण हो . गायत्रीत्वे।
[3] हो . ३संबन्धदेवतःय तं३ लं. ३संबन्धा देवताः।
[4] ड . इत्येवं यः।
[5] आ . ततोनेन पठितेन पादेनय डण हो १ . तप्तेन पादेन।
[6] आ . तेन त्वंय ड . तत्तेन।
[7] कण डण हो . स्त्रीपुरुषरूपेण मिथुनरूपाः।
[8] आ . तयोरप्येषा प्रशंसा।
[9] तं३ ण लं हविष्यान्।
[10] लंण हो . प्रापयित्वा।
[11] मै. ३ यतताम् ३ नास्ति।
[12] त्रिणलंणहो. आगच्छताम्।

ततः अग्नेरेव [1]दूत्यार्हत्वात् [2]तद्दूतका [3]देवाः अभवन्, असुराश्च पराभूताः॥
यस्यैवमित्यादि ॥ गतम् ॥ नङ्प्रत्ययः।

**अग्निरिति ॥**

[4]"अथ " अग्निं दूतम् " (तैब्रा ३.५.२) इत्येतामृचं विशेषतः प्रशंसति-अग्निर्देवानां दूत आसीदुशना कान्योसुराणां तौ प्रजापतिं प्रभमैताँ स प्रजापतिरग्निं दूतं वृणीमह इत्यमि-पर्यावर्तत ततो देवा अभवन् परासुरा यस्यैवं विदुषोग्निं दूतं वृणीमह इत्यन्वाह भवत्यात्मना परास्य भ्रातृव्यो भवति' इति॥

देवाः स्वकार्येष्वनिं दूतत्वेन प्रेषयन्ति, असुरास्तु कवेः पुत्रम् [5]उशनसम्।
'तौ उभावपि प्रजापतिम् उपेत्य पृष्टवन्तौ।
आवयोर्मध्ये [6]"संधिविग्रहादिकार्येषु कस्य दौत्यमुचितमिति"।
तदानीं 'प्रजापतिः "अनि दूतं वृणीमहे " इति अनेन मन्त्रेणोत्तरमुवाच।
उक्त्वा चोशनसः सकाशात् परावृत्याग्नेरभिमुखोभूत्।
'ततः देवानां विजयोभूदसुराश्च पराभूताः।
एवं विदुषः यजमानस्याप्यनेन मन्त्रेण स्वविजयः शत्रुपराजयश्च भवति ॥

**भ्रातृव्यमेवैतया (५) ध्वरति शोचिष्कैशस्तमीमह इत्याह पवित्रमेवैतद्यजमानमेवैतया पवयति समिद्धो अग्न आहुतेत्याह परिधमेवैतं परि दधात्यस्कन्दय यदर्त ऊर्ध्वमभ्याद्ध्याद्यथा बहिःपरिधि स्कन्दति तादृगेव तत्**

**अध्वरवतीमिति ॥**

"समिध्यमानो अध्वरे" (तैब्रा ३.५.२) इत्येताम्।
ध्वरति हिनस्तीति। ध्वृ मूर्छने।

**पवित्रमिति।**

शोचिः संबन्धेन शुचित्वात् पवित्रमियमृक् ॥

**परिधिमिति।।**

"समिद्धो अग्न आहुत" (तैब्रा ३.५.२) इतीयमृक् परिधिस्थानीया।
परिधानं विधानसमापनम्। 'समिद्धः' इति च समाप्तिलिङ्गम्।
अत एवान्याजे वेदितव्या।[7]परिधेर्बहिः बहिः परिधि।
"अपपरिबहिरञ्चवः" (पा २.१.१२) इत्यव्ययीभावः॥

**अध्वरवतीमिति ॥**

"समिध्यमानो अध्वरे" (तैब्रा ३.५.२) इत्येतामृचं विशेषतः प्रशंसति-'अध्वरवतीमन्वाह भ्रातृव्यमेवैतया ध्वरति' [8]इति ॥ हिनस्तीत्यर्थः॥

**शोचिष्केश इति ॥**

तस्यामृचि तृतीयपादं प्रशंसति - 'शोचिष्केशस्तमीमह इत्याह पवित्र- मेवैतद्यजमानमेवैतया पवयति' इति॥
[9]मध्यपादे अग्निः पावक ईड्यः इति पावकशब्देनैव पवित्रत्वं विस्पष्टम्।
अत्र [10]तु शोचिः शब्देन शुचि हेतूनां रश्मीनामुक्तिमभिप्रेत्य पवित्रम् एतद्वाक्यमित्यभिधीयते।
तस्मात् एतया ऋचा 'यजमानम् एव [11]शोधयति।
"समिद्धो अग्न आहुत" (तैब्रा ३.५.२) इत्येषा काचिदध्वरवती।
'देवान् यक्षि स्वध्वर' इत्युक्तत्वात्।
"आजुहोत" (तैब्रा ३.५.२) इत्यसावप्य - ध्वरवती।
'अग्निं प्रयत्यध्वरे' [12]इत्युक्तत्वात्।
तयोरप्यृचोरुक्तप्रशंसा योजनीया।
तदेवं सर्वासामृचां सामान्यतो विशेषतश्च प्रशंसा दर्शिता ॥

**समिद्ध इति ॥**

यदुक्तं सूत्रकारेण-"समिद्धो अग्न आहुतेत्यभिज्ञायैकाम नूयाजसमिधमवशिष्य [13]"सर्वमिध्मशेषमभ्यादधाति " (आपश्री २.१२.६) इति, तदेतत् हृदि निधाय "समिद्धो अग्ने" (तैब्रा ३.५.२) इति मन्त्रं पुनः प्रशंसति समिद्धो अग्न आहुतेत्याह परिधिमेवैतं परिदधात्य-स्कन्दाय यदत ऊर्ध्वमभ्यादध्याद्यथा बहिः परिधि स्कन्दति तादृगेव तत्' इति।

समिद्धो अग्ने ' इत्यनेन भूतार्थवाचिना [14]क्तप्रत्ययेन सामिधेनी साध्यस्याग्निसमिन्धनस्य समाप्तिः सूच्यते।

---

[1] तं३ ण मै४ण लंण हो . दूतार्ह।
[2] हो . न दूतकाः।
[3] मै. एव।
[4] ड . ३अथ ३ नास्ति।
[5] डण श्रृंण हो १ . शुक्रम्।
[6] ड . कार्येषु कः समुचित इतिय हो१ . दिवाक्येषु कः समुचित इति।
[7] तं३ ण लंण हो . ३ बहिरू ३ नास्ति।
[8] डं. ३ इति ३ नास्ति।
[9] श्रृं . मध्यपादे तु। हो १ . पवयति।
[10] आ. ३तु३ नास्ति।
[11] डण अण इण उण जोण पाण हा . ३वाहन . अणइणउणजोण
[12] डण श्रृं . इति श्रुतत्वात्।
[13] क . ° मिद्धशेष।
[14] कण हाण हो १ . उक्त°।

परिसमाप्तये धीयमानः प्रक्षिप्यमाणः काष्ठविशेषः परिधिः।
तथा सति 'समिद्धः' इति समाप्तिसूचनात् एतं मन्त्रं [1]परिधित्वेन स्थापितवान् भवति।
स च परिधिः [2]प्रक्षिप्यमाणानां समिधाम् अस्कन्दाय।

**त्रयो वा अग्नयों हव्यवाहंनो देवानां कव्यवाहंनः पितृणाँ सहरंक्षा असुंराणां त एतद्यां**
**शँसन्ते मां वंरिष्यते मामि (६) ति वृणीध्वँ हव्यवाहंनमित्यांह य एव देवानां**

त्रयो वा इत्यादि।
"हव्येनन्तः पादम्" (पा ३.२.६६) इत्युभयत्र ञ्युट्, "कव्य-पुरीषपुरीष्येषु ञ्युट्" (पा ३.२.६५)।
त्रयः अप्येते अग्नयः अस्मिन् काले आ शसन्ते प्रार्थयन्ते "-[3]"माम् अयं" वरिष्यते इति।
तत्र "वृणीध्वं हव्यवाहनम्" (तैब्रा ३.५.२) इति वचनेन कव्यवाहादिव्युदासेन देवानाम् अग्निर्हव्यवाहन एव वृतो भवति ॥

**आर्षेयमिति ॥**

ऋषेरपत्यम् आर्षेयम्। "इतश्चानिञः"(पा ४.१.१२२) इति ढक्।[4]आत्मीयगोत्र ऋषिः।
तद्धितप्रत्ययान्तानामामन्त्रितविभक्त्या यथाप्रवरं [5]वृणीते सामिधेन्य-नन्तरम्।
यथा भृगूणाम्"अग्ने महाँ असि ब्राह्मण भारत[6] भार्गव च्यावनाप्नुवानौर्व जामदग्न्य" इति पञ्चार्षेयः [7]प्रवरः व्रियते।
अत्र भृग्वादिभिरिष्टोग्निरेव तत्तदपत्यतयोपचर्यते।

**बन्धोरिति।**

बन्धुभ्यो भृग्वादिभ्य एवं वृणानः न एति न च्युतो भवति। अथो अपि च इदमार्षेयवरणम्
अविनाशाय भवति।
[8]"यत् यतः अस्मात्" मन्त्रपाठात् ऊर्ध्वम् आ जुहोत इति मन्त्रे समिधः अभ्यादध्यात्।
यथा आज्यपुरोडाशादिहाविषः परिधेर्बहिः पतनं विनाशाय संपद्यते तादृग् एव तत् द्रष्टव्यम्।
एवं [9]च "प्रणवे प्रणवे" समिधमादधाति (आपश्री २.१२.४) इति सूत्रकारेण प्रतिमन्त्रमवसानकालीने प्रणवे समिदाधानस्योक्तत्वात् 'समिद्धः' इति मन्त्रावसाने समिदेका स्वतः प्रक्षेपणीया प्राप्ता।
'आजुहोत' इत्यस्य त्रिरावृत्त्या तिस्रः समिधस्तत्र प्रक्षेपणीयाः प्राप्ताः।
तदेतच्चतुष्टयं 'समिद्धो अग्ने' इत्येतस्य पादस्य पाठकाल एव प्रक्षिपेदिति विधिरुन्नेयः ॥

**त्रय इति ॥**

चरमायामृचि [10]हव्यवाहनमित्यग्निविशेषणं प्रशंसति- ' त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणार सहरक्षा असुराणां त एतर्ह्या शरसन्ते मां वरिष्यते मामिति वृणीध्व हव्यवाहनमित्याह य एव देवानां तं वृणीते ' इति॥
देवादीनां संबन्धिनो हव्यवाहनादयः अग्नयः प्रत्येकं[11]"माम् एव वरिष्यते", माम् एव वरिष्यते इति एवमपेक्षन्ते।
अतो [12]"देवानेरेव वरणसिद्ध्यर्थं" हव्यवाहनं वृणीध्वम् इति उच्यते ॥

**आर्षेयमिति ॥**

यदुक्तमाश्वलायनेन - सामिधेनीनामुत्तमेन प्रणवेनाग्ने महाँ असि ब्राह्मण भारतेति निगदेवसाय।
[13]"यजमानस्यार्षेयान् प्रवृणीते" यावन्तः स्युः। परं परं [14]"प्रथमम्" (आश्वश्रौ)

**तं वृंणीत आर्षेयं वृंणीते बन्धोरेव नैत्यथो संतंत्यै पुरस्तांदुर्वाचों वृणीते**
**तस्मांत् पुरस्तांदुर्वाञ्च मनुष्यांन् पितरोनु प्र रिंषते ॥ ८ ॥**
[ अशान्तावाह पश्वदशादन्यांहुतयां वरिष्यते मामेकान्नत्रिँशच्चं ]

अस्य पुत्रादिसंतानसमृद्धयै भवति।
यद्वा- 'ऋषिणा हि देवाः पुरुषमनुबुद्ध्यन्ते' इति भृग्वादिभिः प्रसिद्धैः मन्त्रकृद्भिः बन्धुभिः प्रीयमाणैरयं
बन्धुमान् भवति।
ततो देवैरनुबुद्धो भवति, संतानवृद्धिश्च भवति।

**परस्तादिति ॥**

परस्तात् पुरुषादारभ्य अर्वाचः अधस्तादवस्थितानृषीन् वृणीते यथा - भृग्वादयो [15]जमदग्न्यन्ताः।
परशब्दात् पञ्चम्यन्तात् "दिक्शब्देभ्यः" (पा ५.३.२७) इत्यादिना अस्तातिप्रत्ययः।

---

[1] अ० इ० उ० जो० पा०हा० हो १ . परिधत्ते।
[2] आ . प्रक्षिप्यमाणं।
[3] ३० लं० हो . प्रमायम्।
[4] लं . आत्रीयगोत्र।
[5] मै४ . प्रवृणीते।
[6] हो. भार्गवच्यवन१।
[7] लं० हो . १प्रवररू १ नास्ति।
[8] आ . यद्येतस्मात्।
[9] ड . सति प्रणवे।
[10] मित्यग्निं विशेषणए ना . वाहनमग्निं विशेषेण।
[11] आ . १ मामेव वरिष्यते १ नास्ति।
[12] आ०हा. देवा अग्नेरेवंगुण।
[13] ड. यजमान आर्षेयान् प्रवृणुते।
[14] क . १ प्रथमम् १ नास्ति।
[15] तं० त्रि० हो . जमदग्न्यन्तात् य लं. जमदग्न्यान्तान्।

तस्मादिति। परस्तात् अर्वाञ्चः पितरः मनुष्यान् प्रपिपते प्रकर्षेण [1]पिण्डभागितया अनुक्रमेण रक्षन्ति।
अपरे परे पुरुषान् भजन्ते, अपरे परित्यजन्ति। छान्दसः श्लुः आत्मनेपदं च॥
इति द्वितीये पञ्चमे अष्टमोनुवाकः॥
(१.२.२७-१.३.२) इति, [2]तदेतद्विधत्ते - 'आर्षेयं वृणीते बन्धोरेव नैत्यथो संतत्यै' इति॥
ऋषेरपत्यम् आर्षेयम् [3]आत्मीयगोत्रर्षीन्तद्धितप्रत्ययान्तानामन्त्रितविभक्त्या यथाप्रवरं वृणीते।
यथा - "*अग्ने महाँ असि ब्राह्मण भारत।
भार्गव च्यावनाप्नवानौर्व जामदग्न्येति भृगुगोत्राणां पञ्चार्षेयः प्रवरः इति।
अनेन तत्तदपत्यतयाग्निः [4]उपचर्यते।एवं वृणानः पुरुषः 'बन्धोः भृग्वादेः सकाशात् न एति नापगच्छति।
अपि चेदमार्षेयवरणमस्य [5]पुत्रादिसंतानाय भवति॥

**परस्तादिति ॥**

[6]अस्मिन् वरणे प्रकारविशेषं विधत्ते -'परस्तादर्वाचो वृणीते तस्मात् परस्ता- दर्वध्ये मनुष्यान् पितरोनु प्र पिपते' इति॥

वर्तमानं यजमानपेक्ष्य पूर्वभावी यो गोत्रप्रवर्तकस्तमारभ्य तदपत्यपरम्परया अर्वांच: [7]नीचान् वृणीते।

तथैव पूर्वमुदाहृतं-'भृगोरपत्यं च्यवनस्तस्यापत्यमाप्नवान-स्तस्यापत्यम् [8]ऊर्वः तस्यापत्यं जमदग्निस्तस्य [9]संततिजः यजमानः' इति। तदेतदवक्तवम्।

यस्माद्धोता पूर्वभाविनमारभ्यार्वाचो वृणीते तस्मात् एव कारणाल्लोकेपि पूर्वपूर्वभाविनः पितरः उत्तरोत्तरभाविनः पुत्राननुक्रमेण पालयन्ति॥

**इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीय संहिताभाष्ये द्वितीयकाण्डे पञ्चमप्रपाठकेष्टमोनुवाकः ॥।**

[1] मै० लं० हो . विद्याभागि°। त्रि०हो य
[2] हा.तदेतत् अभिधत्ते।
[3] ड . गोत्रर्षिः तद्धितप्रत्ययान्तानामतीतविभक्त्या। ' ;द्र० तैं ब्रा० ३०५०३द्ध। ४;द्र० आपश्रौ २४०५०१२द्ध।
[4] क० हा . उपचर्येत।
[5] अ० इ० उ० जो० ना० पा० हा . पुत्रसंतानाय।
[6] अ० इ० उ० जो० ना० पा० हा . तस्मिन्।
[7] ड . ९ नीचान्९ नास्ति।
[8] आ० ड. और्वः।
[9] आ . संततिः।